(यथा, महाभारते । २ । ३६ । २२ ।
"आचार्य्यमृत्विजञ्चैव संयुजञ्च युधिष्ठिर ।
स्नातकञ्च प्रियं प्राहुः षड़र्घार्हान् नृपं तथा ॥")
संयुक्तश्च ॥

संयुक्तः, त्रि, (सं + युज् + क्तः ।) संयोगाश्रयः । यथा, तिथ्यादितत्त्वे ।
"कुर्य्यादलाभे संयुक्तां नालाभेऽपि प्रवेशिनीम् ॥"

संयुगः, पुं, ("युजिर योगे + घञ् । उञ्छादिषु युगशब्दस्य पाठात् निपातनादगुणत्वम् ।'विशेषोऽसौ निपातनमिष्यते कालविशेषे रथाद्युपकरणे च ।' इति वृत्तिः । सङ्गता रथयुगा यस्मिन् वा ।" इति निघण्टुटीकायां देवराजयज्वा । २ । १७ । २९ ।) युद्धम् । इत्यमरः । २ । ८ । १०५ ॥ (यथा, महाभारते । २ । १७ । ५ ।
"अनयस्यानुपायस्य संयुगे परमः क्षयः ।
संशयो जायते साम्यात् जयश्च न भवेत् द्वयोः ॥")
संयोगश्च ॥

संयुतः, त्रि, संयुक्तः । यथा,—
"चतुर्थीसंयुता कार्य्या पञ्चमी परया न तु ।
दैवे कर्म्मणि पैत्रे च शुक्लपक्षे तथासिते ॥"
इति तिथ्यादितत्त्वम् ॥

संयोगः, पुं, (सं + युज् + घञ् ।) मेलनम् । न्यायमते गुणपदार्थः । स च सम्बन्धविशेषः । अप्राप्तवस्तुद्वयस्य प्राप्तिः । स च त्रिविधो यथा । एककर्म्मजन्यः । यथा पर्व्वते पक्षिसंयोगः ॥ १ ॥ उभयकर्म्मजन्यः । यथा मेषद्वयसंयोगः ॥ २ ॥ संयोगजन्यसंयोगः । यथा कपालतरुसंयोगजन्यतरुकुम्भसंयोगः ॥ ३ ॥ कर्म्मजन्यसंयोगोऽपि द्विविधः । अभिघातः । तस्मात् शब्दो जायते ॥ १ ॥ नोदनः । तस्मात् शब्दो न जायते ॥ २ ॥ अत्र प्रमाणम् ।
"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।
कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्म्मजः ॥
तथोभयोः कर्म्मजन्यो भवेत् संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः ॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः ॥
द्वितीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः ।
अभिघातो नोदनश्च शब्दहेतुरिहादिमः ।
शब्दाहेतुर्द्वितीयः स्यादिभागोऽपि त्रिधा भवेत् ॥"
इति भाषापरिच्छेदः ॥ * ॥
उदयात् पूर्व्वं दशम्याः शेषः । यथा,—
"उदयात् प्राक् दशम्यास्तु शेषः संयोग इष्यते ।
उपरिष्टात् प्रविशस्तु तस्मात् तां परिवर्ज्जयेत् ॥"
इति तिथ्यादितत्त्वम् ॥
सम्बन्धमात्रम् । इति संयोगपृथक्त्वन्यायार्थदर्शनात् ॥

संयोगपृथक्त्वं, क्ली, (संयोगेन फलसम्बन्धभेदेन पृथक्त्वं, नानाविधत्वं यत्र ।) न्यायविशेषः । यथा । एकस्य कर्म्मणो नित्यत्वकाम्यत्वाभ्यां हेतुभ्याङ्गीकारे नित्यानित्यसंयोगविरोधः । सैवं संयोगपृथक्त्वन्यायात् । स च न्यायश्चतुर्थाध्याये उक्तः । यथा । खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इति श्रूयते । अत्र संशयः । किं काम्यस्यैव खादिरता नित्येऽपि स्यादुत नेति । तत्र फलार्थत्वेनानित्यतया नित्यप्रयोगाङ्गता न युक्ता । यत्तु नित्येऽपि खादिरत्वश्रवणं तत् काम्यस्यैव पशुबन्धनाय दृष्टोपायज्ञापनार्थं अतो न नित्ये खादिरता इति प्राप्ते राद्धान्ताय चतुर्थाध्यायसूत्रम् । एकस्य तूभयत्वे संयोगपृथक्त्वमिति । अत्र संयोगः सम्बन्धमात्रं पृथक्त्वं भेदः । एकस्य खादिरस्य क्रत्वर्थत्वपुरुषार्थत्वरूपोभयात्मकत्वे वाक्यद्वयेन च क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदो वगमात् नित्यानित्यसंयोगविरोधः । न चाश्रयज्ञानार्थं नित्यवाक्यं सन्निधानादेवाश्रयलाभात् । अत उभयार्थो खादिरतेति । एवं दध्ना जुहोति दध्नेन्द्रियकामस्य इत्यादावुभयार्थतैव । दधित्वस्य द्वेधाश्रवणात् । इति प्रायश्चित्ततत्त्वम् ॥

संयोगविरुद्धं, क्ली, (संयोगेन विरुद्धम् ।) परस्परसंयोगेन रोगजनकखाद्यद्रव्यम् । यथा,—
"शाकाम्लपलपिण्याककुलत्थलवणामिषैः ।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥
प्राणहारी तु हारीतो हरिद्रालवणैः स्मृतः ।
एरण्डतैलेऽनलभृष्टं विषं मायूरमामिषम् ॥
वराहवरया भृष्टा वलाका तु हरत्यसून् ।
संयुक्ता सैव वारुण्या कुल्माषैश्च विरुध्यते ॥
भवेत् कुसुम्भशाकेन मत्स्यतैलैः कणां त्यजेत् ।
मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशष्कुलीम् ॥
कपोतः सार्षपे भृष्टो घृतं कांस्ये दशाहगम् ।
विषं घृतसमं क्षौद्रं मधुना गगनाम्बु च ॥
मूलकं माषसूपेन मधुना च न भक्षयेत् ।
एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥
रात्र्यन्धवीसर्पदकोदराणां
विस्फोटिकोन्मादभगन्दराणाम् ।
मूर्च्छामदाध्मानगलग्रहाणां
पाण्ड्वामयस्यामविषस्य चैव ॥
किलासकुष्ठग्रहणीगदानां
शोथातिसारज्वरपीनसानाम् ।
सन्तानदोषस्य तथैव मृत्यो-
र्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥
विरुद्धाहारजान् रोगान् विनिहन्ति विरेचनम् ।
वमनं शमनं वापि पूर्व्वं वा हितसेवनम् ॥"
इति संयोगविरुद्धम् । इति राजवल्लभः ॥

संयोगितः, त्रि, जातसंयोगः । संयोगशब्दादितप्रत्ययेन निष्पन्नः । इति संयोजितशब्दटीकायां भरतः ॥

संयोगी, [न्] त्रि, (संयोगोऽस्यास्तीति । संयोग + इनिः ।) संयोगविशिष्टः । यथा,—
"अग्रे वृक्षः कपिसंयोगी न मूले ।" इति सिद्धान्तलक्षणजागदीशी ॥

संयोजनं, क्ली, (सं + युज् + ल्युट् ।) मैथुनम् । इति हारावली ॥ संयोगश्च ॥

संयोजितः, त्रि, (सं + युज + णिच् + क्तः ।) पदार्थः पदार्थान्तरेण संयुक्तीकृतः । तत्पर्य्यायः । उपाहितः २ । इत्यमरः ॥ संयोगितः ३ इति भरतः ॥ (यथा, भागवते । ५ । २३ । ३ ।
"यथामेधीस्तम्भ आक्रमणपशवः संयोजिताः ।
त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति ॥")

संरम्भः, पुं, (सं + रभ + घञ् । नुम् ।) क्रोधः । इति शब्दरत्नावली ॥ (यथा, मनुः । ४ । १६६ ।
"ताड़यित्वा तृणेनापि संरम्भात् मतिपूर्व्वकम् ।
एकविंशतिमाजातीः पापयोनिषु जायते ॥")
आटोपः । इति त्रिकाण्डशेषः ॥ (सम्भ्रमः ॥ यथा, भागवते । ८ । ६ । २४ ।
"न संरम्भेण सिध्यन्ति सर्व्वार्थाः सान्त्वया यथा ॥")
वेगः । यथा, तत्रैव । ८ । ११ । ४५ ।
"संयम्य मन्युसंरम्भं मानयन्तो मुनेर्व्वचः ।
उपगीयमानानुचरैर्ययुः सर्व्वे त्रिविष्टपम् ॥")
उत्साहः । यथा,—
"कार्य्यारम्भेषु संरम्भः स्थेय उत्साह इष्यते ।"
इति साहित्यदर्पणे ३ परिच्छेदः ॥

संरावः, पुं, (सं + रु ल ध्वनौ + "उपसर्गे रुवः ।" ३ । ३ । २२ । इति घञ् ।) शब्दः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३४२ ।
"ततस्तस्य सरित्पाते सुमहान् संरावमग्रतः ।
ऊर्द्ध्वबाहुर्महद्भूतं प्रादुरासीत् महौजसः ॥")

संरावी, [न्] त्रि, प्रशस्तशब्दविशिष्टः । संरावशब्दादस्त्यर्थे इनप्रत्ययेन निष्पन्नः ॥

संरूढ़ः, त्रि, (सं + रुह + क्तः ।) प्रौढ़ः । अङ्कुरितः । इति मेदिनी ॥ (यथा, महाभारते । १२ । २२८ । २ ।
"तन्नो मनसि संरूढ़ं करिष्यामस्तथा च तत् ॥"

संरोधः, पुं, (सं + रुध + घञ् ।) रोधनम् । (यथा, भागवते । १० । ७३ । २ ।
"क्षुत्क्षामाः शुष्कवदनाः संरोधपरिकर्शिताः ।
ददृशुस्ते घनश्यामं पीतकौशेयवाससम् ॥")
क्षेपः । इति मेदिनी ॥

संलग्नः, त्रि, संयुक्तः । सम्पूर्व्वलगधातोः क्तप्रत्ययेन निष्पन्नः ॥ यथा, कथासरित्सागरे । १२३ । १११ ।
"स चाब्धिवेलया नीत्वा विधिनत्येव रोधसि ।
क्षिप्तस्तद्दीपसंलग्नो महाभल्लोऽवसन्नवान् ॥"

संलयः, पुं, (सं + ली + अच् ।) निद्रा । इति हेमचन्द्रः ॥ प्रलयश्च ॥

संलापः, पुं, (सं + लप + घञ् ।) परस्परभाषणम् । इत्यमरः ॥ अन्योन्यं प्रीतिभाषणं संलापः । उक्तिप्रत्युक्तिभावेन विरोधरहित मन्योन्यभाषणं संलापः । इति परेऽपि । रहसि भाषणं संलापः । इति कौमुदी । मिथोऽन्योन्यं रहस्यपि । इति वक्ष्यति । समन्ताल्लपनं संलापः प्रियादिकथा घञ् । यस्त्वालापः स तु केनापि क्रियते । इदन्तु परस्परभाषणमेवेति भेदः । इति भरतः ॥ "उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्त्यते ।" इत्युज्ज्वलनीलमणिः ॥